# Kranti Gitam

# क्रान्तिगीतम्

## Document Information

Text title : Kranti Gitam

File name : krAntigItam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : August 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# क्रान्तिगीतम्

(गीतिका) (स्रग्विणी वृत्तम्)
क्रान्तिगीतं भजध्वं भजध्वं सखे ।
    क्रान्तिमार्गं श्रयध्वं श्रयध्वं सखे ।
क्रान्ति-गीतामृतं पीयतां पीयतां
    देशहेतोर्मुदा जीवनं दीयताम् ॥ क्रान्ति० ॥

पालिना पोषिता वर्धिता लालिता
    मातृभूम्यां स्वरक्तार्चितास्तोषिता ।
दुष्ट-दैत्यैर्हता शोषिता पीडिता
    क्लेश-घातेन दुखेन सम्पीडिता ॥ क्रान्ति० ॥

धर्म एषोऽस्ति मातुः सदा रक्षणे
    प्राणदानं मुदा संश्रयध्वं सखे ।
पासुभिः पूतपूतैर्विवृद्धिं गता
    रक्षणीया सदा प्राणदानेन सा ॥ क्रान्ति० ॥

क्रान्तिवह्नि समन्ताच्चरेद् भारते
    क्षोभ-दावाग्नि-दाहो दहेज्जीवनम् ।
लोभ-कामादि-कीटाणु-नाशो भवेत्
    स्वार्थनाशोऽस्तु दैन्याऽधिनाशो भवेत् ॥ क्रान्ति० ॥

जागृति सञ्चरेत्, क्रोधवह्नि सरेद्,
    मातृ-दुःखाग्नि-दाहो जने सञ्चरेत् ।
व्योममालां प्रवर्धेत् स्फुलिङ्गान् सदा
    जीवने क्षोभमालां प्रवृद्धिं व्रजेन् ॥ क्रान्ति० ॥

त्रायतां त्रायतां रक्ष्यतां रक्ष्यतां
    मातृभूमिर्हता हीनवृत्तैरियम् ।
त्रास-शोकेन सन्तप्तगात्रा सदा

रक्षणं याचते स्व-सुपुत्रानियम् ॥ क्रान्ति० ॥

क्रान्ति-मन्त्रोदयं स्यात् समन्तात् शुभं
क्रान्ति दावाग्नि-दाहश्चरेज्जीवने ।
शोक-शोषं प्रणाशो न यावद् भवेद्
मातृपादेऽर्पितं स्यान्निजं जीवनम् ॥ क्रान्ति ॥

शत्रुनाशो भवेद्, दैत्यनाशो भवेत्,
तापनाशो भवेत्, शोकनाशो भवेत् ।
स्वार्थलिप्सा-परः कीट-मृत्युः व्रजेद्
देशद्रोही न देशेऽवशिष्टो भवेत् ॥ क्रान्ति० ॥

ये तु विश्वासघाताः नरा भारते
क्रान्ति-वह्नौ समे ते लयं प्राप्नुयुः ।
देशद्रोही न क्षम्यं कदाचिद् भवे
देश-विश्वास-घाती च घात्यं सदा ॥ क्रान्ति० ॥

क्रान्तिगानं चरेत्, क्रान्तिगानं सरेत्
क्रान्तिगानं लसेत्, क्रान्तिगानं फलेत् ।
क्रान्तिगानं मतं शान्ति-मूलं सदा
क्रान्तिगानं तु देशस्य सौभाग्यदम् ॥ क्रान्ति० ॥

Proofread by Mandar Mali

---

*Kranti Gitam*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*